National Journal of
Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2026; 1(69): 13-17
© 2026 NJHSR
www.sanskritarticle.com

अनीककुमारदासः
शोधच्छात्रः,
रामकृष्ण-मिशन्-शैक्षणिक-शोध-संस्था,
बेलुड-मठः, हावड़ा, पश्चिम बंगाल

Correspondence:
Aneek Kumar Das
Research Scholar,
Ramakrishna Mission Vivekananda,
Educational and Research Institute,
Belur Math, Howrah, West Bengal,
India, 711202.

॥ उपनिषदामद्यत्वे उपयोगिता॥

Aneek Kumar Das

Abstract
लेखेऽस्मिन् प्रप्रथमम् उपनिषदां सामान्यपरिचयं निर्वर्ण्य साक्षात् मुख्यसमस्यायाः निरूपणं कृतम् **'उपनिषदां प्रामाण्याप्रामाण्यम्'** इति बिन्दुना। तत्र आधुनिकानां पाश्चात्यानुकारिणता तथा वेदादिषु अनादरः वर्णितः। अपि च नानाविधदृष्टान्तपुरस्सरं पौनःपुन्येन जगत्कर्तुः ब्रह्मणः अस्तित्वम् अवबोधितम्। ततश्च **'ईश्वरजिज्ञास्यत्वे हेतुः'** इति बिन्दौ ब्रह्मज्ञानप्रवृत्तिप्रयोजनादिविषयाः सुष्ठु आलोचिताः। एवमग्रे घोरस्यास्य संसारस्य अमोघरहस्यं, मुक्तिः इत्यादिविषयाः **'जीवनरहस्यम्'** इति बिन्दौ निरूपिताः। पाश्चात्यदार्शनिकानामपि बहूनाम् उपनिषत्तत्त्वजिज्ञासूनाम् स्वीयमतानि अपि प्रदर्शितानि। एवञ्च व्यवहारदशायाम् उपनिषत्तत्त्वानां क्वाऽपि उपयोगो वर्तते वेति **'उपनिषदां लोकोपयोगाः'** इति विन्दौ उपस्थापितम्। ततश्च करुणामय्याश्श्रुतेः लोकहितकरा उपदेशाः तदुपयोगिताश्च प्रदर्शिताः। नाचिकेतोपाख्यानादिद्वारा यथा श्रेयःप्रेयोविवेकविज्ञानं उपनिषत्सु निर्वर्णितं तदत्र **'गुरुसम्मिता उपनिषत्'** इति बिन्दौ प्रदर्शितम्। तदनन्तरं **'औपनिषद्युगे समाजः'** इति बिन्दौ चातुर्वण्यव्यवस्थाविषये चतुराश्रमव्यवस्थाविषये अपि च नानाविधसंस्कारविषये साम्प्रतिकसमयदृष्ट्या विशिष्टं विवेचनं कृतम्। अद्यत्वे दैनन्दिनात्मकेन्द्रिकजीवनचर्याव्यस्तानां जनानां शान्तिलाभाय सुप्तहिंसाद्वेषकामवाञ्छापूर्णे स्वार्थलिप्साभूरिष्ठे लौकिकविषये प्रवृत्तिः, उपनिषन्निहिता एव सा अन्विष्यमाणा शान्तिः, इत्यादिसाम्प्रतिकसामाजिकविचारसम्बद्धाः विषयाः **'वर्तमानप्रजन्मे उपनिषत्सापेक्षत्वम्'** इति बिन्दौ समुपस्थापिताः। एवञ्चान्ते **'महाजनो येन गतस्स पन्थाः'** इति बिन्दौ विवेकानन्दादिमहापुरुषाणाम् उपनिषत्प्रीतिः सुवर्णिता।
एवं सद्गुरोः सकाशाद् उपनिषत्सारोपदेशश्रवणेन ब्रह्मज्ञानं न भवति चेदपि, न्यूनातिन्यूनं सामयिकदुःखेषु मानसिकम् उद्विग्नत्वं चाश्वल्यं वा स्ववशे तिष्ठतीति मे मतिः। अतः यद्यपि जन्मादिमरणान्ते जीवने प्रत्यक्षतः उपनिषदां तथा उपयोगिता नास्तीति प्रतीयेत, किन्तु वस्तुतः तासां महन्माहात्म्यं वर्तते। उपनिषदां शिक्षणं यस्मात्कालात् क्रमशः न्यूनं जायमानमस्ति, ततः कालादेव क्रमशः सामाजिककलहः, लोभः, द्वेषः, हिंसनम् इत्यादीनि दुष्कर्माणि वर्धमानानि सन्ति। इदानीं यदि पुनः उपनिषन्निहितं ज्ञानं जनेषु संवर्धते तदा जनाः अपकर्मणः स्वतः निवर्तन्ते। अतः अस्माभिः उपनिषत्सु श्रद्धावद्भिः इति शम्।

भूमिका - यत्र 'संस्कृतम् इति मे उच्चतरशिक्षाविषयः' इति श्रवणादेव तस्य संस्कृतच्छात्रस्य मौर्ख्यं बौद्धिकदौर्बल्यं वा अनुमीयते तत्र उपनिषदां का कथा। एवं स्थितावपि संस्कृतपठितृषु केचन एव श्रद्धया उपनिषदः ज्ञातुं प्रवर्तन्ते। तेषु च धीराः अङ्गुलीगण्याः एव। किन्तु वस्तुतः अद्यत्वे, अस्मिन् कलियुगस्य उपान्त्यपर्याये उपनिषदां ज्ञानम् अत्यन्तम् आवश्यकम्। अतः इहाऽस्मिन् शोधप्रबन्धे, अद्यत्वे उपनिषदां माहात्म्यं कथम् अस्ति, किमर्थम् अस्माभिः उपनिषदध्ययनं विधेयम् इत्यादिविषयान् आधारीकृत्य विचारः प्रस्तूयते।

उपनिषदां सरलपरिचयः - अस्माकं संस्कृतिर्हि वेदमूला। वेदानुसारिण्याम् अस्याम् सनातनपरम्परायां द्वैताद्वैतविशिष्टाद्वैतादिसिद्धान्ताः सुस्पष्टं वर्णिताः। अपौरुषेयः वेदः प्रत्येकमपि मन्त्रब्राह्मणाऽरण्यकोप-

निषद्भेदेन चतुर्धा विभक्तः। आरण्यकादीनां समस्तवेदानां साररूपा उपनिषद् आत्मज्ञानस्य प्रतिपादिका। उपनिषदः वेदान्तपदेनाऽपि अभिधीयन्ते। वेदानाम् अन्ते अन्तिमभागे पठितत्वात्, वेदानां सारः अन्तः सारविषयः इत्यर्थे च उपनिषदां वेदान्तेति आख्या। उप-नि-पूर्वकाद् षद्लृधातोः क्विपि उपनिषदिति रूपम्। उपनिषदः सहस्राधिकाः सन्ति इति श्रूयते। मुक्तिकोपनिषदनुसारम् अष्टाधिकैकशतसंख्यकाः उपनिषदः वर्तन्ते। एवम् श्रूयमाणेऽपि दशानाम् उत एकादशानामेव उपनिषदां प्रामाण्यं पण्डितैः स्वीक्रियते। तथाहि प्रसिद्धा कारिका-

ईशकेनकठप्रश्नमुण्डमाण्डुक्यतित्तिरिः।
ऐतरेयञ्च छान्दोग्यं बृहदारण्यकं तथा॥[1]

- इति। एताः विहाय श्वेताश्वतरोपनिषदमपि केचन प्रामाणिकत्वेन परिगणयन्ति। उपनिषदः वेदसारभूताः, उपनिषत्सारभूता च श्रीमद्भगवद्गीता। उपनिषत्तत्त्वानां सूत्ररूपेण ग्रथनं यत्र सः ब्रह्मसूत्रग्रन्थः। एतत्त्रयम् आहत्य प्रस्थानत्रयम् इति आख्यायते। एतत्प्रस्थानत्रयभाष्यकृच्छ्रीमच्छङ्करभगवच्चरणाः विनष्टप्रायस्यास्य वेदान्तशास्त्रस्य पुनःप्रतिष्ठातारः प्राचीनप्रवीणज्ञानपरम्परायाः मानदण्डरूपेण मध्ये विराजमानाः सन्ति। एतेषाम् आचार्याणां प्रस्थानत्रयोपरि निर्मितं भाष्यम् तत्त्वयाथार्थ्यनिर्णये प्रमाणीभूतम् इति विद्वांसः।

उपनिषदां प्रामाण्याप्रामाण्यम् - कुत्रचित् प्रवृत्तौ विषयद्वयज्ञानम् अनिवार्यं भवति। प्रथमं तु तद्विषयस्वरूपज्ञानं, द्वितीयं तावत् तद्विषयेण सह प्रवृत्तिमतः सम्बन्धः अर्थात् तद्विषये प्रवृत्तस्य प्रवृत्त्यनन्तरं लाभः कः स्यात् इति। तथाहि कारिका-

सिद्धार्थं सिद्धसम्बन्धं श्रोतुं श्रोता प्रवर्तते।
शास्त्रादौ तेन ज्ञातव्यः सम्बन्धः सप्रयोजनः॥

-इति। अतः अस्मिन् प्रसङ्गे आलोच्यमिदं यत् 'किमर्थम् उपनिषदं पठेयम्' इति। वस्तुतः हिन्दूनां कृते अयं प्रश्नः रवेः प्रकाशनकर्तृत्वे हेत्वन्वेषणवद् भाति। भोजनादिवत् स्वाध्यायः, वेदोच्चारणं नित्यं कर्म एव। तथाहि श्रुतिः- "स्वाध्यायप्रवचनाभ्यां न प्रमदितव्यम्"[2]। अतः तद्विषये शङ्का एव न स्यात्। तथापि आधुनिकाः पाश्चात्यानुकारिणः अद्यतनीयाः तु स्वधर्मगौरवं विस्मृत्य विज्ञानमात्रं विश्वसन्ति। आधुनिकवैज्ञानिकप्रमाणाऽगम्यं यत्किञ्चित् एतैः न अनुमन्यते। आधुनिकं विज्ञानञ्च चार्वाकवत् प्रत्यक्षमेव अङ्गीकरोति। तेन अनुमानोपमानशब्दादिगम्याः सूक्ष्मदार्शनिकविषयाः तैः व्यर्थप्रलापवत् तिरस्क्रियन्ते।

एतेषां भ्रान्तमतीनां कृते उच्यते, अयि भोः! कदाचित् चिन्तितं युष्माभिः यत्, किमर्थं कथं वा तव जन्म जातम्। प्रायः वदेत् - जगतः नियमानुसारं पितुः औरसात् जातम् इति। अयि भो चार्वाक! किमर्थं तव जन्म तव पित्रोः गृहे जातम्, आम्बानीमहोदयस्य अपि भवितुं शक्यते स्म। किमर्थं तव जन्म अत्रैव अस्मिन् भारतदेशे जातम्, देशान्तरेऽपि भवितुम् अर्हति स्म। अवश्यम् तत्र किञ्चित् कारणं वर्तते येन प्रत्येकस्य शिशोः तादृशं जन्म भवति। यदि एतदपि न अङ्गीक्रियते तत्र ब्रूमः, अस्तु तावत्, सामान्यनियमानुसारमेव जन्म इति कथञ्चिद् अङ्गीकुर्मः। किन्तु, कस्यचित् जन्मान्धस्य शिशोः अन्धत्वकारणं किम् इति प्रश्नस्य किमपि उत्तरम् अस्ति वा भवतां सकाशे। अयि भोः प्रारब्धक्षयार्थाः एते भोगाः। एतत्सर्वं अवगन्तुं युष्माभिः उपनिषद् अध्येया। न हि एतादृशं सूक्ष्मवस्तु प्रत्यक्षमात्रानुसारिण्या विज्ञानबुद्ध्या शक्यते अधिगन्तुम्।

अयि भोः, किमेतत् कदापि चिन्तितं यत् यत्र सामान्यस्य कस्यचिदपि वस्तुनः निर्माणे कश्चन कर्ता अवश्यं भवति, तत्र समग्रस्यास्य जगतः अपि कश्चन कर्ता अवश्यं स्यात्। तर्हि सः कः ? यदि उच्यते सर्वं तु चेतनैः जीवैः एव क्रियते, मनुष्यैः एव निर्मीयते सर्वम् इति। तं प्रति उच्यते, अयि भोः सूर्यस्य गतिः कः नियमयति ? को वा जीवस्य श्वासोच्छ्वासं कारयति, भुक्तस्य अन्नस्य स्वापकालेऽपि स्वतः एव परिपाकः कथं भवति ? गर्भाधानानन्तरं शुक्राणोः क्रमशः मानवदेहत्वेन परिणामे किं कारणम् ? एतद्विषये जीवविज्ञानस्य (Biology) व्याख्यानं केचन दद्युः। तत्रापि सूक्ष्मचिन्तनं क्रियते चेत् स्पष्टम् अवगम्यते यत् एताः सर्वा अपि प्रक्रियाः पूर्वमेव निर्मात्रा संकल्पिताः वर्तन्ते।

अयि भोः, एतत्तु ज्ञायत एव यत् माध्याकर्षणबलेन महाकर्षबलेन च पृथिव्यादिग्रहाः सूर्यं परितः भ्रमन्ति। किन्तु वैज्ञानिकदृष्ट्या तु सूर्यः तेजःपिण्डमात्रम् अर्थात् जडवस्तु। तर्हि अचेतनेन जडवस्तुना सूर्येण कथम् एतादृशबलं प्रसार्यते। तर्हि अवश्यं कश्चन स्यात् यः एतत्सर्वं परिचालयति। सः कः ? वस्तुतस्तु आधुनिकविज्ञानपदेन यद् विवक्ष्यते तत्र नूतनवस्तुनः सृष्ट्यपेक्षया पूर्वस्थितस्यैव तत्त्वस्य आविष्कारमात्रम् आधिक्येन परिदृश्यते।

ईश्वरजिज्ञास्यत्वे हेतुः - अत्रेदानीं कश्चन कुतार्किकः वदेत्- अस्तु नाम कश्चन, किन्तु तदस्तित्वं संसाध्य अस्माकं को लाभः इति। तं प्रति उच्यते- लाभः अस्ति भोः। स च युष्माभिस्सर्वैरपि सुपरिज्ञात एव, किन्तु अनवधानकारणात् बुद्धिगोचरो न भवति। स्वस्वनित्यकार्याद् अवसरः लभ्यते चेत् एकान्ते चिन्तयतु। आजन्मनः इदानीं यावत् यद्यत् कृतं, यद्यच्च क्रियमाणं वर्तते, तेन वस्तुतः कोऽपि लाभः भवति वा ? सूक्ष्मबुद्ध्या चिन्त्यमेतत्। लोकनियमानुसारं जन्म भवति। ततश्च षड्भावविकारक्रमेण अन्त्ये अपक्षयः, मृत्युः। तावदेव। सर्वेषामपि साधारणतया तथैव अस्ति। शिशोः जन्मानन्तरमेव सम्पर्काः कल्प्यन्ते। ततस्तस्य शिक्षारम्भः, मित्रलाभः, यूनत्वं, वृत्तिः, विवाहः, सन्ततिः, सन्ततिपरिपालनं, पितृपरिपालनम् एवं क्रमेण वार्धक्यं, ततः मृत्युः इति क्रमः। एतन्मध्ये प्रतिमुहुर्तम् सर्वत्र दुःखमेवास्ति। मध्ये कदाचित् वृत्तिलाभात् इष्टवस्तुलाभाद्वा क्षणिकं सुखं लभ्यते चेदपि शीघ्रमेव तत्रापि दुःखम् उत्पद्यते। तर्हि एतावन्मात्रस्य सुखस्य कृते आजन्मनः मरणपर्यन्तं एतावद् दुःखं किमर्थं सह्यते। जन्म एव नापेक्षते। अस्माज्जननमरणचक्राद् मुक्तिः अपेक्षते। सा च मुक्तिः सर्वस्रष्टुः ईश्वरस्य ब्रह्मणः ज्ञानेनैव भवति। एतदवगन्तुं प्रथमम्, अस्य जगतः निस्सारत्वम् अनुभवितव्यम्। ततश्च सद्गुरोः सकाशाद् उपनिषदध्ययनेन ब्रह्मविषयकोपदेशग्रहणम्। ततः क्रमशः चित्तशुद्ध्यादिद्वारा युक्ताधिकारी भूत्वा जगत्सारभूतस्य ब्रह्मणः स्वरूपानुभवरूपः मोक्षः मुक्तिः।

जीवनरहस्यम्- संसारः बहुविचित्रः। आध्यात्मिकाधिभौतिकाधिदैविकरूपतापत्रयात्मकेस्मिन् संसारे जन्मकैशोरयौवनवार्धक्यमृत्युचक्रे पुनः पुनः आवर्तमानाः सर्वेऽपि वयं जराव्याधिमृत्युपीडिताः

बहुप्रयत्नेनापि दुःखं निवारयितुम् असमर्थाः, स्त्रीपुत्रधनादिद्वारेण क्षणिकसुखार्थं सर्वदा सर्वथा प्रयतामहे। परन्तु स्वगृहोद्यानस्थज-पापुष्पं विहाय गरलसागरमध्यस्थद्वीपगतकर्कटकण्टकावृतपुष्करिणी-मध्यस्थकमलचयनम् इव सुखभ्रामकानि इमानि विषयसुखानि सुखप्रलोभनद्वारा अस्मान् दुःखसागरे पातयन्ति। पङ्कनिमग्नः इव यावत् बहिरागन्तुं यतते तावत् अधिकनिमग्नः भवति। जन्मनः आरभ्य मृत्युपर्यन्तं षड्भावविकारान्तर्गतम् अस्माकं जीवनम्। मध्ये समयः लौकिकस्थूलविषयासक्तो भूत्वा एव अपगच्छति। प्रत्यगात्मविषये चिन्तनार्थम् अवसर एव न लभ्यते। एवंभूतस्य घोरस्यास्य संसारस्य अमोघरहस्यं किमिति निश्चेतुम् ऋषयः तात्कालिकवैज्ञानिकाः सूक्ष्मदृष्ट्या बहुधा विविच्य उच्चचिन्ताशक्त्या ध्यानादिद्वारेण मनः शान्तीकृत्य अस्मात् जराव्याधीमरणादिदुःखात्मकजन्ममृत्युचक्रात् निस्तारार्थम् अद्वितीयमुपायमेकं साक्षात्कृतवन्तः तद्धि औपनिषदं प्रत्यगात्मज्ञानम्। मैक्समुलारप्रमुखानां बहूनां उपनिषत्तत्त्वजिज्ञा-सूनाम् पाश्चात्यदार्शनिकानाम् उपनिषच्चिन्तनम् तेषां स्वीयमतानि अपि एतदेव प्रमाणीकरोति यत् संसारस्यास्य गूढरहस्यम् संसारान्मुक्तिरूपा शान्तिः, या च उपनिषन्निहिता एव। पाश्चात्यदार्शनिकः विन्टरनित्समहोदयः उपनिषदां माहात्म्यं वर्णयन् प्रसिद्धजर्मन्-दार्शनिकस्य शोपेनहावर-महोदयस्य विचारम् उद्धरति "उपनिषदः मे जीवने शान्तिसाधनभूताः, एवं मरणे प्राप्तेऽपि शान्तिसाधनभूताः स्थास्यन्ति"[3] इति।

उपनिषदां लोकोपयोगाः – वस्तुतस्तु सम्यगालोच्यमाने परिलक्ष्यते यत् सम्पूर्णोऽप्ययं लेखः उपनिषदां लौकिकप्रयोजनमूलतयैव लिखितः। किन्तु एतदप्यवधेयं यत् विधिवदुपनिषदध्ययनेन लौकिकप्रयोजनेन समम् अलौकिकप्रयोजनान्यपि बहुधा सेत्स्यन्ति। किन्तु आधुनिकानां रुच्यभावात् लेखेऽस्मिन् तेषां विस्तारः नेष्यते। सम्पूर्णस्य लेखस्य लौकिकप्रयोजनसापेक्षत्वेऽपि किमर्थं भिन्नतया एकः बिन्दुः स्थापितः इति चेदुच्यते एतेषां प्रयोजनानां लौकिकत्वसाम्येऽपि परस्परं भिन्नत्वात्। एवञ्च व्यवहारदशायाम् उपनिषदां क्वापि उपयोगः भवति वा इति पूर्वपक्षीणां बहुधा आक्षेपः भवति। तत्रोच्यते गुरूपसदनपूर्वकं ज्ञानार्जनं, कर्तव्याकर्तव्यताज्ञानं, लोकव्यवहारः, लौकिकव्यसनानां निःसारत्वावबोधः, सुखदुःखयोः अस्पृहता अनुद्विग्नता, सूक्ष्मचिन्ता-विकासः, वर्णाश्रमादिव्यवस्थायाः यौक्तिकता इत्यादयः बहवः उपयोगाः वर्तन्ते उपनिषदाम्। विस्तारशस्तु अग्रिमबिन्दुषु अवगच्छामः।

गुरुसम्मिता उपनिषत् – करुणामयी श्रुतिः सर्वदैव अस्माकं कल्याणाय सदुपदेशान् प्रयच्छति। किन्तु वयमेव तत्कृपाम् अवगन्तुम् असमर्थाः। तदुपदेशानाम् अस्मज्जीवने सुष्ठु उपयोगे सति अस्माकम् अधिकाधिकसमस्याः स्वतः निरस्ताः भविष्यन्ति। तथाहि उच्यते-सत्यं वद, धर्मं चर, स्वाध्यायान्मा प्रमदः[4] ... मातृदेवो भव, पितृदेवो भव[5].. इत्यादि। एतादृशोपदेशानां यथावत् परिपालने चारित्रि-कोन्नत्या समं लौकिकजीवनेऽपि उन्नतिर्भवति। सैषा श्रुतिः कदाचित् प्रभुसम्मिततया उपदिशति कदाचिच्च श्वेतकेतुनाचिकेताद्यु-पाख्यानमुखेन। रामादिवत्प्रवर्तितव्यं न रावणादिवत्, श्रेयोविषये प्रत्यगात्मनि मनो निवेशनीयः न तु प्रेयोविषये। तथाहि काठके -

अन्यच्छ्रेयोन्यदुतैव प्रेयस्ते उभे नानार्थे पुरुषं सिनीतः।
तयोः श्रेयो आददानस्य साधु भवति हीयतेऽर्थाद्य उ प्रेयो वृणीते॥[6]
श्रेयश्च प्रेयश्च मनुष्यमेतस्तौ सम्परीत्य विविनक्ति धीरः।
श्रेयो हि धीरोऽभि प्रेयसो वृणीते प्रेयो मन्दो योगक्षेमाद्वृणीते॥[7]

-इति। प्रेयो हि व्यष्टिचिन्तनप्रधानायाः स्वार्थसङ्कीर्णायाः बुद्धेः विषयः। यस्तु उन्मुक्तचेताः समष्टिचिन्तकः सार्वकभावनाप्रधानः स तु श्रेयोमार्गमेव वाञ्छति। कदाचिदेषा श्रुतिः रूपकोदहरणैः उपदिशति। यथा कठोपनिषदि रथरूपककल्पना। इन्द्रियाणि हि चञ्चलानि सर्वदा स्वस्वविषयान् प्रति धावमानानि भवन्तीति तु स्वानुभवविज्ञात एव। तथाहि काठकश्रुतिः "पराञ्चि खानि व्यतृणत्स्वयम्भूस्तस्मात्पराङ् पश्यति नान्तरात्मन्"[8] इति। एवम् इन्द्रियाणाम् अनियत्रणकारणात् अबाधविचरणेन बहुविधहानिः जायते इति परिदृश्यते। तर्हि एतादृशपरिस्थितिः अस्माभिः कथं रक्षणीया इति विषये श्रुतिः उपदिशति।

आत्मानं रथिनं विद्धि शरीरं रथमेव तु।
बुद्धिं तु सारथिं विद्धि मनः प्रग्रहमेव च॥[9]
इन्द्रियाणि हयानाहुर्विषयांस्तेषु गोचरान्।
आत्मेन्द्रियमनोयुक्तं भोक्तेत्याहुर्मनीषिणः॥[10]

- इति। एवं करुणामयी श्रुतिः मन्दबुद्धीनां सुलभबोधाय मानवशरीरेण सह रथस्य सादृश्यं प्रकल्प्य कर्तव्याकर्तव्योपदेशं करोति। तथाहि मानवदेहं यदि रथत्वेन कल्प्यते तदा रथः शरीरम्, रथस्वामी आत्मा, रथचालकः बुद्धिः, प्रग्रहं हि मनः, इन्द्रियाणि अश्वाः इत्येवं सादृश्यं परिकल्पयितुं शक्यम्। तत्र इन्द्रियाणि अश्वाः इव सर्वदा बहिः इतस्ततः धावमानानि सन्ति। यथा रथविषये रथस्वामिनः आज्ञया रथचालकः प्रगहचालनकौशलेन अश्वान् अनिष्टलक्ष्येभ्यो निवर्त्य इष्टलक्ष्यं प्रति गन्तुं नियमयति तद्वत् प्रकृतविषये स्वात्मनः इच्छया संयमबुद्धिः मनोनिग्रहकौशलेन इन्द्रियाणि अनिष्टविषयेभ्यो निवर्त्य इष्टविषयमात्रे प्रेरयति। श्रुत्याशयस्तावत् इन्द्रियाणि तु चञ्चलानि किन्तु तेषाम् अनिष्टविषयेभ्यो निग्रहः करणीयः। कथमिति भगवता उच्यते-"अभ्यासेन तु कौन्तेय वैराग्येण च गृह्यते"[11] इति। बृहदारण्यकभाष्ये भाष्यकाराः "न हि अनभ्यस्ते विषये कौशल-मिन्द्रियाणां भवति"[12] इति।

एवमिन्द्रियनिग्रहोपायप्रकथनपुरस्सरम् अनिष्टपरिहारे सहकुर्वन्ति उपनिषदः।

औपनिषद्युगे समाजः - अद्यत्वे समाजव्यवस्थायाः का दशा इति तु सर्वजनविदिता एव। सर्वविधविषयेषु पाश्चात्यानुकारिणः आधुनिकाः स्वपूर्वाचार्यप्रणीतं मार्गं विस्मृतवन्तः। किं नासीत् वैदिकपरम्परायाम् ?कर्तव्यकर्मविधानम्, अनुचितकर्मनिषेधः, जनानां कार्यसामर्थ्या-नुसारं ब्राह्मण-क्षत्रिय-वैश्य-शूद्ररूपचातुर्वर्ण्यविभागः, आय्वनुसारं ब्रह्मचर्य-गार्हस्थ्य-वानप्रस्थ-संन्यासरूपचतुराश्रमव्यवस्था, गुरुगृहे गुरुसेवा-निष्ठस्य छात्रस्य गुरुकृपया ज्ञानप्राप्तिः इत्येवं श्रद्धासिक्ता शिक्षाव्यवस्था, सुनियन्त्रिता सामाजिकस्थितिः इत्यादिनानाविषयाः अद्यापेक्षया वैदिककाले एव युक्ततरा आसीत् इति तु स्पष्टप्रतिपन्नैव।

एतदतिरिच्य नानाविधसंस्कारविषये तत्काले जनाः श्रद्धावन्तः आसन्। अद्यतनीयाः आधुनिकमानिनः तु तेषां संस्काराणां वैज्ञानिकत्वम् अनवगम्य आपातदृष्ट्या तान् कुसंस्कारान् मत्वा परित्यक्तवन्तः। अद्यत्वे तु विद्यालयः पृथङ्निर्मीयते, यत्र छात्राः शिक्षकाश्च गत्वा पठनपाठनादिकं कुर्वन्ति। तत्काले गुरुगृहमेव विद्यालयः। स्वाध्याये एव मनः नियुक्तो भवति स्म। तस्मात्तेषां बुद्धिसामर्थ्यमपि महान् आसीत्। गुरुः साक्षात् परं ब्रह्म एव आसीत् शिष्याणाम्। अद्यत्वे तु शिक्षकेति शब्दः वृत्तिमात्रे पर्यवसितः।

केचन वदन्ति वर्णाश्रमव्यवस्थाः समाजे भेदं जनयन्तीति। अवश्यम्, अद्यत्वे वर्णव्यवस्थायाः या परिणतिः सञ्जाता तया पक्षोऽयम् अङ्गीकरणीय एव। किन्तु अस्माभिः अवधार्यं यत् अद्यतनस्थितेः कारणमपि उपनिषदनध्यायः। यतो हि भगवान् गीतायां स्वयं प्रोवाच "चातुर्वर्ण्यं मया सृष्टं गुणकर्मविभागशः"[13] इति। अर्थात् वर्णविभागः एवमेव मनःकल्पितः विभागः नास्ति अपि तु बुद्धिपूर्वकं क्रियमाणः आवश्यकः विभागः। कथमिति चेत्, यः यस्मिन् विषये कुशलः तस्मिन्नेव सः नियुज्यते चेत् उत्तमफललाभः स्यात्। किन्तु यदि पाके पारदर्शिनः पाठे च अपारदर्शिनः कस्यचित् पाकपाठयोर्मध्ये पाठे एव नियुक्तिः स्यात् तत् किं लाभाय भवेत्। एवमेव वैदिककाले ये शास्त्राध्ययनाध्यापनपटवः शुद्धचिन्ताशीलाः आसन् ते ब्राह्मणत्वेन निर्वाचिताः। ये राजधर्मपालने युद्धादिषु समर्थाः ते क्षत्रियत्वेन विभाजिताः। एवमेव अन्येषाम्। तथाहि कारिका-

अहिंसा सत्यमस्तेयं शौचमिन्द्रियनिग्रहः।
एतत्सामासिकं धर्मं चातुर्वर्ण्येऽब्रवीन्मनुः॥[14]

-इति। एवं गुणकर्मसामर्थ्यानुरोधेन विभागः कृतः आसीत्। किन्तु अद्यत्वे तु ब्राह्मणस्य पुत्रः निकृष्टं कर्म करोति चेदपि स ब्राह्मणत्वेनैव परिगण्यते। शास्त्रेषु तु स्पष्टम् उच्यते -

जन्मना जायते शूद्रः संस्कारात्द्विज उच्यते।
वेदपाठाद्भवेद्विप्रः ब्रह्म जानाति ब्राह्मणः॥[15]
शूद्रो ब्राह्मणतामेति ब्राह्मणश्चैति शूद्रताम्।
क्षत्रियाज्जातमेवं तु विद्याद्वैश्यात्तथैव च॥[16]

-इति। तर्हि अत्र किं विभागकर्तुः दोषः उत विभागनियमान् सम्यक् पालयितुम् असमर्थानाम्, उपनिषदध्ययनविरतानाम् अस्माकम् इति चिन्त्यमेतत्।

वर्तमानप्रजन्मे उपनिषत्सापेक्षत्वम् – वैदिककर्मकाण्डं विहाय अपि उपलभ्यमानं तत्त्वज्ञानम् अवलोक्य एतत् स्पष्टं यत् सनातनधर्मः न केवलं स्थूलाचारसर्वस्वः अपि तु सूक्ष्मचिन्तनभूरिष्ठः। धर्माचरणे आचारः आवश्यकः एव किन्तु दर्शनहीनः आचारः समाजं कलुषीकरोति। तादृशधर्मीयताण्डवाः समाजे विभाजनं सृजन्ति। अतः वर्तमानप्रजन्मनः भविष्यत्प्रजन्मनः च सामाजिकधर्मीयविकासे उपनिषदां महदवदानम् वर्तते इति वक्तुं शक्नुमः। भारतीयदर्शनस्य मूलं हि उपनिषत्तत्त्वाधारितम्। विवेकानन्दस्वामिचरणाः औपनिषत्तत्त्व-विषये निगदन्ति यत् अद्वैतवादः एव धर्मस्य चिन्तनस्य च सारः इति।

किञ्चिद् सूक्ष्मावलोकनेन अस्माभिः अवबोद्धुं शक्यं यत् समाजे सामञ्जस्यं श्रेयःप्रेयोमुखेन भवति। अर्थात् यदेव व्यष्टिविषयकं चिन्तनं स्वीयप्रयोजनमात्रसिद्धये युज्यते तदेव प्रेयः, यच्च समष्टिविषयकं चिन्तनं सामग्रिकप्रयोजनानुरोधेन वृहत्तरस्वार्थसिद्धये युज्यते तदेव श्रेयः। काठके नाचिकेतोपाख्याने प्रेयोनिन्दापुरस्सरं श्रेयसः विधानं यौक्तिकचिन्तनानुसारं विहितम्। तेन कठोपनिषदः समाजकल्याण-कारित्वं स्पष्टम्। एवं सर्वत्रैव उपनिषत्सु अद्वैतदर्शनं अस्माकं ताण्डवोचितान् कलुषितान् धर्मीयाचारान् अतिरिच्य सार्विक-कल्याण-साधकम् उदारचेतस्सुलभं तत्त्वं बोध्यते येन साम्प्रदायिक-भेदाः धर्मीयहिंसाचरणम् इत्याद्यपकर्मप्रवृत्तिः शाम्येत। वेदेषु उच्यते–

संगच्छध्वं संवदध्वं सं वो मनांसि जानताम्।
देवा भागं यथा पूर्वे सञ्जानाना उपासते॥[17]
समानो मन्त्रः समितिः समानी समानां मनः सह चित्तमेषाम्।
समानां मन्त्रमभिमन्त्र ये वः समानेन वो हविषा जुहोमि॥[18]

-इति। एवं तैत्तरीयोपनिषदि अपि – "ओम् सह नाववतु। सह नौ भुनक्तु। सह वीर्यं करवावहै। तेजस्वि नावधीततमस्तु मा विद्विषावहै॥ ओम् शान्तिः शान्तिः शान्तिः॥"[19] इत्येवं सर्वत्र साम्यस्य सौहार्दस्य वार्ता उपनिषत्सु वर्तते।

अद्यत्वे जनानां सूक्ष्मचिन्तनप्रवृत्तिरेव विनष्टप्राया। ते दैनन्दिनात्म-केन्द्रिकजीवनचर्यायाम् अत्यन्तं व्यस्ताः। जीवने शान्त्यन्वेषणे मत्तवत् लौकिकविषयेषु प्रवर्तन्ते। तदर्थमेते एतादृशं कृत्रिमविनोदनम् आश्रयन्ते यत्र न विद्यते निर्मलता शुद्धता, यत् पूर्णतया सुप्तहिंसाद्वेषकामवाञ्छापूर्णम् स्वार्थलिप्साभूरिष्ठम्। सांसारिककर्तव्य-पालनानन्तरम् ईश्वरः अस्माकं शान्तेः आश्रयः भवितुम् अर्हतीति धारणा (Concept) एव अधिकाधिकानाम् अमूलकत्वेन प्रतिभाति। आयोज्यमानाः धर्मीयोत्सवाः पूजार्चनो-पासनादयः अद्यत्वे उत्सवमात्रत्वेन कतिपयदिनस्य उल्लासमात्रे पर्यवसितः। स्वधर्मे भक्तिप्रदर्शनमात्रं कैश्चित् क्रियते। अधिकाधिकैस्तु तदपि न क्रियते। तेषां दृष्ट्या तु एतत्सर्वम् अर्थस्य समयस्य च अपव्ययमात्रम्। किन्तु बहिः दृश्यमानेभ्यः धर्मीयाचरणेभ्यः पूजोपासनादिभ्यः परेऽपि सूक्ष्मतत्त्वम् किञ्चत् वर्तते, यदेव उपनिषन्मूलम् चित्स्वरूपम्। अयं औपनिषद्भावः भ्रान्तप्रजन्मस्यास्य यथार्थशान्त्यन्वेषणे समर्थः।

श्रीरामकृष्णपरमहंसाः वदन्ति वृक्षस्य बाल्यावस्थायामेव गोछागेभ्यो रक्षणार्थम् आवरणाद्युपायाः आश्रयणीयाः इति। एवं बाल्ये कैशोरे वा शिशोः निरपेक्षजिज्ञासाः अधिकाः भवन्ति। तत्काले एव तं शिशुम् औपनिषदालोकेन मार्गः प्रदर्शनीयः, येन सः उन्मार्गगामी न भवेत्।

महाजनो येन गतस्स पन्थाः – न हि सर्वः सर्वं जानाति। किन्तु तस्मात्कारणात् अन्यथाचरणं तु मूर्खाय शोभते। धीमन्तस्तु संशये सति महामानवानामेव मार्गम् अनुसरन्ति। उपनिषदां माहात्म्यं तदाश्रयणीयत्वञ्च यदा विचार्यते तदा संशयमतिभिः अवश्यं महापुरुषाणां जीवनचरितम् अनुसन्ध्येयम्। किञ्चित् अनुसन्धाने क्रियमाणे ज्ञातुं शक्यते यत् यः कोऽपि स्वजीवने वास्तविकीम् उन्नतिं सिसाधयिषुः सर्वोपि वेदान्तसन्निकटम् आगतः एव। यतो हि सांसारिकविषयभोगार्थम् विविधसाधनानि सर्वत्र सुलभानि वर्तन्ते, किन्तु स्वात्मनः उन्नतेः मार्गः यत्र क्वापि नैव उपलभ्यते। तदर्थं श्रद्धया सद्गुरोः कृपापुरस्सरम् उपनिषदाम् आश्रयः स्वीकरणीयः। भगवान् बुद्धः, महावीरः, स्वामी विवेकानन्दः, श्रीशङ्कराचार्यः प्रमुखाः

महान्तः दार्शनिकाः उपनिषत्साहचर्येणैव आत्मोन्नतिं साधयाञ्चक्रुः। उपनिषदाम् आङ्गलानुवादव्याख्याकाराणां स्वाधीनभारतस्य द्वितीयराष्ट्रपतिचरणानां श्रीराधाकृष्णन्महोदयानां वचने समुपलभ्यते "उपनिषदामित्थं महान् समादरः न हि तासाम् श्रुतिसारत्वात् अपितु एतासां स्वीयं नित्यमर्थवत्त्वम् आत्मिकशक्तिः एव तत्र कारणम्, यद्वशात् भारतवासिनः वंशानुक्रमेण परम्परया अन्तर्दृष्टिं बलं शुभप्रेरणाञ्च लभन्ते"[20] इति। एतेन तेषाम् औपनिषत्प्रीतिः सुस्पष्टा एव। महात्मागान्धीमहोदयोऽपि उपनिषद्भ्यः स्वप्रेरणां लभते स्म इति श्रूयते। एतदवलोक्य अवश्यम् एतैः महापुरुषैः आश्रितः मार्गः दिग्भ्रान्तैः आश्रयणीयः।

उपसंहारः - एवं सद्गुरोः सकाशाद् उपनिषत्सारोपदेशश्रवणेन ब्रह्मज्ञानं न भवति चेदपि, न्यूनातिन्यूनं सामयिकदुःखेषु मानसिकम् उद्विग्नत्वं, चाञ्चल्यं वा स्ववशे तिष्ठति इति मे मतिः। अतः यद्यपि जन्मादिमरणान्ते जीवने प्रत्यक्षतः उपनिषदां तथा उपयोगिता नास्ति इति प्रतीयेत, किन्तु वस्तुतः तासाम् महन्माहात्म्यं वर्तते। उपनिषदां शिक्षणं यस्मात् कालात् क्रमशः न्यूनं जायमानं वर्तते, ततः एव क्रमशः सामाजिककलहः, लोभः, द्वेषः, हिंसनम्, इत्यादीनि दुष्कर्माणि वर्धमानानि सन्ति। इदानीं यदि पुनः उपनिषन्निहितं ज्ञानं जनेषु भवति तदा जनाः अपकर्मणः स्वतः निवर्तन्ते। अतः अस्माभिः उपनिषत्सु श्रद्धावद्भिः भाव्यम्। न च तथा श्रद्धावद्भिः यैः उपनिषद्ग्रन्थो मन्दिरे संस्थाप्य तत्पूजनम् क्रियते। अवश्यं तत्र अर्थादिज्ञानपुरस्सरं पाठः अपेक्ष्यते। उपनिषदां सारभूतं तत्त्वम् अस्माकं हृद्गतं भवेत्। तदैव वयम् अज्ञानान्धकारात् बहिरागम्य ज्ञानप्रकाशे जीवितुं शक्नुम इति शम्।

॥ आश्रितग्रन्थसूची ॥

॥ संस्कृतपुस्तकानि ॥

१) श्रीमद्भगवद्गीता॥ केन्द्रीयसंस्कृतविश्वविद्यालयः॥ डी.वी. प्रिन्टर्स्। 97-यू.वी., जवाहर नगर। दिल्ली-110007॥ 12th Edition। 2021॥

२) शास्त्री।सुब्रह्मण्यः॥उपनिषद्भाष्यम् (Vol-3)॥ श्रीदक्षिणामूर्ति-मठप्रकाशन। वाराणसी। 2nd Edition । 2011॥

३) शास्त्री।जगदीश॥ब्रह्मसूत्रशांकरभाष्यम्॥ मोतीलाल बनारसीदास। कोलकाता। 6th Reprint। 2018॥

४) शास्त्री मुसलगांवकर। गजाननः॥ वेदान्तपरिभाषा॥ चौखम्बा विद्याभवन। वाराणसी। 221001॥

५) स्वामी। श्री तुलसीरामः॥ मनुस्मृतिः॥ रञ्जन पबलिकेशनस्॥ 2008॥

॥ हिन्दीपुस्तकानि॥

१) ईशादि नौ उपनिषद्॥ गीताप्रेस। गोरखपुर। 12th Edition। 2017॥

२) बृहदारण्यकोपनिषद्॥ गीताप्रेस। गोरखपुर। 12th Edition। 2017॥

॥ बङ्गीयपुस्तकानि ॥

१) বশ্বিরূপানন্দ । স্বামী ॥ বেদান্তদর্শন ॥ উদ্বোধন কার্যালয়। কলকাতা। November 2008॥

२) Mete। Jayanta॥ History of Education in In India (Bengali Edition)॥ Tripura University। Vikas publishing house PVT. LTD.॥

॥ आन्तर्जालीयतथ्यसूत्राणि ॥

१) अद्वैतशारदा - https://advaitasharada.sringeri.net/

२) Archive - Internet Archive: Digital Library of Free & Borrowable Books, Movies, Music & Wayback Machine

३) विकीस्रोतः – विकिस्रोतः (wikisource.org)

४) Sanskrit Document Sanskrit Documents Collection : Home Page

पादटिप्पणी

[1] मुक्तिकोपनिषद् (30)

[2] तैत्तिरीयोपनिषद् (11.1)

[3] विन्टारनित्स, हिस्ट्री आफ इन्डियन लिटरेचर (पृ. 267)

[4] तैत्तिरीयोपनिषद् (11.1)

[5] तैत्तिरीयोपनिषद् (11.2)

[6] कठोपनिषद् (1.2.1)

[7] कठोपनिषद् (1.2.2)

[8] कठोपनिषद् (2.2.1)

[9] कठोपनिषद् (1.3.3)

[10] कठोपनिषद् (1.3.4)

[11] श्रीमद्भगवद्गीता (6.35)

[12] बृहदारण्यकोपनिषद्भाष्यम् (4.4.2)

[13] श्रीमद्भगवद्गीता (4.13)

[14] मनुस्मृतिः (10.63)

[15] स्कन्दपुराणम् (239/31)

[16] मनुस्मृतिः (10.65)

[17] ऋग्वेदः (10.191.2)

[18] ऋग्वेदः (10.191.3)

[19] तैत्तिरीयोपनिषद् (शान्तिमन्त्रः)

[20] द प्रिंसिपल उपनिषद्, पृ. (18-19)